कक्षा, स्त्री, (कष-हिंसादौ + सः टाप् च ।) हस्ति-रज्जुः । काञ्ची । गेहप्रकोष्ठकः ।
(यथा, भागवते ३ । १५ । २७ ।
"तस्मिन्नतीत्य मुनयः षडसज्जमानाः
कक्षाः समानवयसावथ सप्तमायाम्" ।)
भित्तिः । साम्यम् । रथभागः । अन्तरीयपश्चिमाञ्चलम् । परिधानवस्त्रस्य पृष्ठतो निहिताञ्चलम् । उद्ग्राहिणी । इति हेमचन्द्रः ॥ (काछा काँचा आँचल इत्यादि भाषा ॥ यथाह योगियाज्ञवल्क्यः ।
"परिधानाद्बहिः कक्षा निबद्धा ह्यासुरी भवेत्" ॥)
"वामे पृष्ठे तथा नाभौ कक्षात्रयमुदाहृतम् ।
एभिः कक्षैः परीधत्ते यो विप्रः स शुचिः स्मृतः" ॥
इति स्मृतिः ॥
स्पर्द्धापदम् । इति मेदिनी रत्नस्य ॥ कक्ष्या । हस्तिमध्यदेशबन्धनरज्जुः । इत्यमरटीकायां भरतः ॥
क्षुद्ररोगविशेषः । तस्य लक्षणं यथा,—
"बाहुपार्श्वांसकक्षेषु कृष्णस्फोटां सवेदनाम् ।
पित्तप्रकोपसम्भूतां कक्षामित्यभिनिर्दिशेत्" ॥
इति माधवकरः । तच्चिकित्सा यथा,—
"कक्षाञ्च गन्धनाम्नीञ्च चिकित्सति चिकित्सकः ।
पैत्तिकस्य विसर्पस्य क्रियया पूर्ब्बमुक्तया" ॥
इति भावप्रकाशः ॥

कक्षापटः, पुं, (कक्षाकारः हस्तिरज्जुतुल्यः पटोवस्त्रम् ।) कौपीनम् । इति हलायुधः ॥ (कक्षायाः गृहप्रकोष्ठकस्य पटः इति विग्रहे गृहभित्तिस्थपटः ॥)

कक्षावान्, [त्] पुं, (कक्षा सर्व्ववस्तुनि साम्यं सा विद्यते यस्य । कक्षा + मतुप् मस्य वः ।) मुनिविशेषः । इति हेमचन्द्रः ॥

कक्षावेक्षकः, पुं, (कक्षायाः अवेक्षकः यद्वा कक्षां वनोपवनादिकं राजान्तःपुरं वा अवेक्षते इति । अव + ईक्ष + ण्वुल् ।) शुद्धान्तपालः । उद्यानपालः । रङ्गाजीवः । कविः । षिड्गः । द्वाःस्थः । इति मेदिनी ॥

कक्षोत्था, स्त्री, (कक्षात् जलप्रायदेशात् उत्तिष्ठति जायते या । कक्ष + उत् + स्था + कः टाप् च ।) भद्रमुस्ता । इति राजनिर्घण्टः ॥

कक्ष्यं, क्ली, (कक्षायै साम्याय भवम् । कक्षा + यत् ।) एषणिकाख्यकटोरा । इति मिताक्षरा । निक्तिर वाटी इति भाषा ॥ (त्रि, कक्षपूरकः । यथा, ऋग्वेदे ५ । ४४ । ११ ।
"श्येन आसामदितिः कक्ष्यो मदो-
विश्ववारस्य यजतस्य मायिनः" ॥)

कक्ष्या, स्त्री, (कक्षे भवा । कक्ष + शरीरावयवात् + यत् टाप् च ।) कक्षरज्जुः । काकरड़ी इति ख्याता । चर्म्मरज्जुः । इत्यन्ये । इति भरतः ॥ गजमध्यबन्धनचर्म्मरज्जुः । इति सारसुन्दरी । तत्-पर्य्यायः । वृषा २ वरत्रा ३ । इत्यमरः । २।८।४२। वृषा ४ दृष्या ५ दूष्या ६ कक्षा ७ । इति तट्टीका । हर्म्म्यादिप्रकोष्ठः । राजगृहादेर्वेष्टनावच्छिन्नो देशः । (महल इति भाषा । यथा रामायणे । २ । २० । ११ ।
"प्रविश्य प्रथमां कक्ष्यां द्वितीयायां ददर्श सः ।
ब्राह्मणान् वेदसम्पन्नान् वृद्धान् राज्ञाभिसत्कृतान्" ॥)
काञ्ची । इत्यमरः ॥ ३।३।१५७ । अन्तर्गृहमिति सुभूतिः ॥ (यथा, कुमारे ७ । ७० ।
"क्रान्तानि पूर्ब्बं कमलासनेन
कक्ष्यान्तराण्यद्रिपतेर्विवेश" ॥)
सादृश्यम् । उद्योगः । बृहतिका । उत्तरीयवस्त्रम् । इति हेमचन्द्रः ॥ गुञ्जा । इति शब्दरत्नावली ॥

कख र म हासे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) एदित् घटादिः इति वोपदेवः । पाणिनीमते तु एदित्वं न तेन अकखीत् अकाखीत् इति स्यात् ।) म कखयति र अकखीत् । इति दुर्गादासः ॥

कख्या, स्त्री, (कखति हसतीव प्रकाशते शोभते । कख + यत् + स्त्रियां टाप् ।) कक्षा । हर्म्म्यादिप्रकोष्ठः । इति शब्दरत्नावली ॥

कग म र क्रियायां । क्रियामात्रे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अकं च-सेट् । घटादि एदित् इति वोपदेवः । नैदित् इति पाणिनिः । अकगीत् अकागीत् ।) तेन म कगयति । एं अकगीत् । क्रियामात्रे । कगति लोकः गच्छतीत्यर्थः । इति दुर्गादासः ॥

कङ्कः, पुं, (कङ्कते उद्गच्छति इति । ककि गतौ । कक् + अच् + इदित्वान्नुम् ।) पक्षिविशेषः । काँक इति भाषा । तत्पर्य्यायः । लोहपृष्ठः २ । इत्यमरः । २।५। १६ ॥ सदंशवदनः ३ खरः ४ रणालङ्करणः ५ क्रूरः ६ आमिषप्रियः ७ । इति राजनिर्घण्टः ॥ अरिष्टः ८ कालपृष्ठः ९ किंशारुः १० लोहपृष्ठकः ११ । इति जटाधरः ॥ दीर्घपादः १२ दीर्घपात् १३ । इति शब्दरत्नावली ॥ (यथा भागवते ३ । १० । २३ ।
"कङ्कगृध्रबटश्येनभासभासकबर्हिणः" ।) यमः । क्षत्रियः (?) । इति मेदिनी ॥ युधिष्ठिरराजः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ४ । ६ । १४ ।
"पृच्छन्तु मे जानपदाः समागताः
कङ्को यथाहं विषये प्रभुस्तथा" ॥
शाल्मलिद्वीपान्तर्गतपञ्चमवर्षपर्ब्बतः । तद्विवरणं विष्णुपुराणे २ अंशे ४ अध्याये द्रष्टव्यम् । क्षत्रियः । इति शब्दमाला ॥ कंसासुरभ्राता । स तु उग्रसेनपुत्त्रः । (यथा, भागवते ९ । २४ । २४ ।
"कंसः सुनामा न्यग्रोधः कङ्कः शङ्कुः सुहूस्तथा" ॥)
महाराजचूतः । इति राजनिर्घण्टः ॥

कङ्कटः, पुं, (कं देहं कटति आवृणोतीति । क + कट + अच् । अथवा-ककि लौल्ये इति कङ्कते चलेन नाशतां याति अचिरस्थायित्वात् ककि + अटन् ।) (कवचः । इत्युणादिकोषः ॥ प्रतिसंस्कृतेनामरस्य ॥ (यथा, रघुः । ७ । ५९ । "सर्व्वायुधैः कङ्कटभेदिभिश्च" ॥)

कङ्कटकः, पुं, (कङ्कट + स्वार्थे कन् ।) सन्नाहः । इत्यमरः । २ । ८ । ६४ । साँजोया इति भाषा ॥

कङ्कणं क्ली, (कं शुभं कणतीति । क + कण शब्दे + कर्त्तरि अच्-पृषोदरादित्वात् णत्वम् ।) स्वनामख्यातहस्ताभरणम् । तत्पर्य्यायः । करभूषणम् २ ॥ इत्यमरः २ । ६ । १०८ ॥ कौतुकम् ३ । इति शब्दरत्नावली ॥ (यथा, भागवते ६ । १६ । ३० ।
"मृणालगौरं सितिवाससं स्फुरत्
किरीटकेयूरकटित्रकङ्कणम्" ॥)
हस्तसूत्रम् । मण्डनम् । शेखरम् । इति विश्वः ॥

कङ्कणी, स्त्री, (ककि गतौ घञ् कङ्कः तस्मिन् अणति-अण शब्दे ततः अच् गौरादित्वात् ङीष् । शकन्ध्वादिवत् सन्धिः । यद्वा कं सुखं कणति इति कण + पचाद्यच् ।) किङ्किणी । क्षुद्रघण्टिका । इत्यमरटीकायां भरतः ॥

कङ्कणीका, स्त्री, (चङ्कणते पुनः पुनः कणति । कण-शब्दे अस्माद् यङ्लुगन्तात् "चङ्कणः कङ्कण च" ॥ ४ । १८ । उणां इति ईकन् धातोः कङ्कणादेशश्च ।) क्षुद्रघण्टिका । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कङ्कतं, क्ली, (कङ्कते शिरोमलं प्राप्नोतीति । ककि गतौ + अतच् ।) कङ्कतिका । इत्यमरटीकायां भरतः ॥ चिरुणी इति ख्यातम् ॥

कङ्कतः, पुं, (कङ्कते भूमिं भित्त्वा उद्गच्छति झटिति नाशं गच्छति वा । ककि गतौ इति धातोः अतच् ।) वृक्षः । इत्युणादिकोषः ॥ (केशप्रसाधनी कङ्कती । चिरुणीइति भाषा । यथा, अथर्व्ववेदे १४ । २ । ६८ । "कृत्रिमः कङ्कतः शतदन्य एषः । अपास्याः केश्यं मलमपशीर्षण्यम् लिखात्" ॥ अल्पविषप्राणिविशेषः । यथा, ऋग्वेदे । १ । १९१ । १ ।
"कङ्कतो नकङ्कतोऽथो सतीनकङ्कतः" ॥)

कङ्कतिका, स्त्री, (कङ्कते मूर्द्धजेन सम्बन्धं गच्छतीति । ककिगतौ बाहुलकादतच् । गौरादित्वात् ङीष् स्वार्थे कन् केश इति ह्रस्वः । यद्वा कस्य शिरसोऽङ्गाः । शकन्ध्वादित्वात् सन्धिः । कङ्केषु अतति ततः क्वुन् । तत इत्वं टाप् च ।) केशप्रसाधनार्थ-काष्ठादिनिर्म्मितद्रव्यम् । चिरुणी काँकुइ इत्यादि भाषा । तत्पर्य्यायः । प्रसाधनी २ । इत्यमरः । २ । ६ । १३९ ॥ कङ्कती ३ कङ्कतम् ४ प्रसाधनम् ५ । इति तट्टीका । केशमार्जनम् ६ । इति जटाधरः ॥ फणी ७ फणिका ८ फणिः ९ । इति शब्दरत्नावली ॥ अस्य गुणाः । धूलीजन्तुमलकण्डुशिरोरोगनाशित्वम् । कान्तिकेशवृद्धिकेशप्रसन्नताकारित्वञ्च । इति राजवल्लभः । नागबला । इति वैद्यकम् ॥

कङ्कती, स्त्री, (कङ्कते शिरोरुहं प्राप्नोति । ककि गतौ + बाहुलकादतच् गौरादित्वात् ङीष् ।) कङ्कतिका । इत्यमरटीकायां भरतः ॥

कङ्कचोटः, पुं, (कङ्कात् पक्षिविशेषात् आत्मानं त्राति । कङ्क + त्रा + अटन् पृषोदरादित्वात् साधुः । यद्वा कङ्कवत् चोटयति कङ्क + चुट् + णिच् + कर्त्तर्य्यण् ।) मत्स्यविशेषः । काँकिला इति भाषा । तत्पर्य्यायः । जलव्यधः २ । इति त्रिकाण्डशेषः ॥

कङ्कचोटिः, पुं, (कङ्कस्य चोटिरिव चोटिस्तुण्डमस्य ।) मत्स्यविशेषः । काँकिला इति भाषा । तत्पर्य्यायः । जलसूचिः २ । इति जटाधरः ॥